॥ अथ एक सप्ततिमोऽध्याय: ॥ Chapter-71

वसिष्ठ उवाच :- शृणु राजन् प्रवक्ष्यामि कौकिलं मतमुत्तमम् ।
गौतमादिकुलाचारं वर्तते श्रीनिकेतने ॥ १

महालयादिश्राद्धे च विवाहे यज्ञमण्डपे ॥
नागानां पूजनं कुर्यात् द्विपार्वणं श्राद्ध माचरेत् ॥ २

यथैव कौकिल? पित्रा मात्रा त्यक्त: प्रवर्धते ।
परै: स च मृत: पश्चादाप्नुयात् स्वपितु: कुलम् ॥ ३

पित्रा दत्ता तथा कन्या भर्तृगोत्रमुपैति च ॥
सा कन्या म्रियमाणा तु पितृगोत्रमुपालभेत् ॥ ४

सपिंडीकरणात् पूर्वं चतुर्थी कर्मणा: परम् ॥
भर्तृकं भजते गोत्रमेषा कौकिलनिर्णय: ॥ ५

मातु:सपिण्डनं कुर्यात् कृत एव तु कौकिल: ॥
मातु: पित्रा सहैवस्यात् जीवति तु न तदा भवेत् ॥ ६

तत्र प्रमातामहेनैव चैषा कौकिलनिर्णय: ॥
मृत्तिकापंचलिंगानि वटस्य रोपणं तथा ॥ ७

-०-

१ ए नागाना
२ ए कर्मणो

लक्ष्मीगौर्यादिमूर्तिश्च पूज्या तत्र विवाहके ।।
मंगलानामष्टकं तत्र त्रिच्छाशा गौरिपूजनम् ।। ८

कुलेवादिककार्यन्तु विवाहात् प्रथमे दिने
कुर्युः श्रीमालिनः सर्वे ऽत्याज्यं वस्त्रमधौतकम् ।। ९

क्षौरकर्मादिकं कर्म चण्डीकर्म तथैव च ।।
दशाहपिंडकं कर्म कुर्यात्तन्नवमे ऽहनि ।। १०

त्रिप्रागोधूमपूर्वैस्तु [१ए] दशकर्म विशेषतः ।।
एकादशं सपिण्डं च सर्वतुल्यं प्रवर्तते ।। ११

एतत्प्रमाणं श्रीमाले गौतमं कुललक्षणम् ।।
कौकिलं च विदित्वा च कर्तव्यन्तु श्रीमालिभिः ।। १२

तस्मात् कौकिलां स्मृतिं दृष्ट्वा कर्म समाचरेत् ।।
[२ए] तस्य कर्मानुसारेण वर्तते श्रीनिकेतने ।। १३

-0-

१ ए दशाकर्म

२ ए तस्या

एतत्प्रमाणं वर्तन्ते ये च तत्र जना नृप ॥
तेषां लक्ष्मी प्रसन्ना च वर्तते च सदा कुले ॥ १४

एतते कथितो राजन् कुलाचारो यथाश्रुतः ॥
यं श्रुत्वा मानवो भक्त्या कुलविख्यापितो भवेत् ॥ १५

-०-

इति श्री स्कन्द पुराणे एकाशीति साहस्र्यां संहितायां तृतीय परिच्छेदे ब्राह्म विभागे श्रीमाल माहात्म्ये गौतमादि कुलाचार कथनं नामक सप्ततितमोऽध्यायः ॥